मनुना तत् सीमोक्ता। (तयोर्विन्ध्यहिमाचलयोः)। पुण्यभूप्रभृतयोऽप्यत्र।

**पुण्यरात्र** पु॰ पुण्या रात्रिः अच् समा॰ रात्रान्तत्वात् पुंस्त्वम्। पुण्यायां रात्रौ। [चन्द्रलोकादौ कर्म॰। २धर्मिष्ठजने च।

**पुण्यलोक** पु॰ पुण्यप्राप्यो लोकः शा॰त॰। १पुण्येन प्राप्ये

**पुण्यवत्** त्रि॰ पुण्य+भूमार्थे मतुप् मस्य वः। बहुपुण्ययुक्ते अमरः। स्त्रियां ङीप्।

**पुण्यशकुन** न॰ पुण्यसूचकं शकुनम्। १शुभसूचके शकुने साध्यतया तदस्यास्ति अच्। २तत्साधने त्रि॰ "मयूराः पुण्यशकुनाः हंससारसचातकाः" भा॰उ॰१४२अ॰।

**पुण्यशील** त्रि॰ पुण्यं शीलयति शील–अण् उप॰स॰। नियतपुण्यानुष्ठायिनि।

**पुण्यश्लोक** त्रि॰ पुण्यः पुण्यदायकः श्लोको यशश्चरित्रं वा यस्य। "पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः। पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दनः" इत्युक्तेषु १नलादिषु। २पुण्यचरितयुक्तमात्रे च ३द्रौपद्यां स्त्री शब्दमा॰ ४वैदेह्यां स्त्री।

**पुण्यसम** अव्य॰पुण्यं समं यत्र तिष्ठद्गु प्र॰अव्ययी॰। तुल्यपुण्ये

**पुण्यसहम** न॰ नील॰ता॰ उक्ते सहमभेदे तदानयनप्रकारस्तत्रोक्तो यथा "सूर्योनचन्द्रान्वितमह्नि लग्नं रवीन्दुयुक्तं निशि पुण्यसंज्ञम्। शोध्यर्क्षशुद्धाश्रयभान्तराले लग्नं न चेत् सैकभमेतदुक्तम्"। "यत्राब्दे पुण्यसहमे शुभं सोऽब्दः शुभावहः"। अनिष्टेऽस्मिन् शुभं नेति पुण्यमादौ विचारयेत्"।

**पुण्यस्थान** न॰पुण्यनिमित्तं स्थानम्। १पुण्योत्पादनसाधने स्थानभेदे २लग्नावधिके नवमस्थाने च ज्यो॰। [मात्रे च।

**पुण्या** स्त्री पु–उण्य। १तुलस्यां शब्दमा॰। २पुण्यजनकस्त्री

**पुण्यात्मन्** त्रि॰ पुण्य आत्मा यस्य। पुण्यस्वभावे तेषां परलोकगतिप्रकारः पद्मपु॰ क्रिया॰ उक्तो यथा "सुप्रज्ञोवाच शृणु विप्र! प्रवक्ष्यामि यत्त्वया श्रोतुमिष्यते। पुण्यात्मनां पापिनाञ्च पन्थानं सुखदुःखदम्। आदौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम्। शृणुष्व द्विजशार्दूल! शृण्वतां प्रीतिवर्द्धनम्। प्रस्तरैरिष्टकैर्बद्धो दिव्यवस्त्रैः समावृतः। भाति पुण्यात्मनां पन्थाः सर्वोपद्रववर्जितः। क्वचिद्गन्धर्वकन्याभिर्गीयते गानमुत्तमम्। क्वचिन्मञ्जुशरीराभिरप्सरोभिश्च नृत्यते। क्वचिच्च वीणाक्वणनं नानावाद्यं मनोहरम्। क्वचित् कुसुमवृष्टिश्च क्वचिद्वायुः सुशीतलः। क्वचित् क्वचिद्दीर्घिकाश्च फुल्लपद्मसुशोभिताः। क्वचित्पुण्याः शीततोयाः कुत्रचित् भक्तशालिकाः। क्वचिद्देवाश्च गन्धर्वाः पठन्तस्तवमुत्तमम्। सुच्छायाः पादपाः क्वापि पुष्पिता वञ्जुलादयः। समस्तसुखसम्पन्ने पथि गच्छन्ति मानवाः। पुण्यात्मानो द्विजश्रेष्ठ! सुखमृत्युमवाप्य च। केचित्तु रत्नमारूढा नानालङ्कारभूषिताः। उद्दण्डधवलच्छत्रैर्गच्छन्त्यावृतमस्तकाः। केचिद्यान्ति गजारूढा रथारूढाश्च केचन। यानारूढा जनाः केचित् सुखेन यममन्दिरम्। केचिद्देवाङ्गनाहस्तन्यस्तचामरवायुभिः। गच्छन्ति वीजिता मर्त्याः स्तूयमानाः सुरर्षिभिः। केचिद्दिव्याम्बरधराः सुचन्दनविभूषिताः। भुञ्जतो यान्ति ताम्बूलं पुण्यात्मानो यमालयम्। निजगात्रत्विषा केचिज्ज्वालयन्तो दिशो दश। व्रजन्ति शमनागारं चलद्दुग्धहनिवासिनः। केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः। सुधापानं प्रकुर्वन्तः पथि गच्छन्ति केचन। केचिद्दुग्धं पिबन्तश्च केचिद्दिक्षुरसं तथा। केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम्। केचिद्दधीनि खादन्तः केचिन्नानाफलानि च। केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै। तानागतांस्ततो दृष्ट्वा नरान् धर्मपरायणान्। भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत्। चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः। शङ्खचक्रगदापद्मधारी गरुडवाहनः। स्वर्णयज्ञोपवीती च स्मेरचारुतराननः। किरीटी कुण्डली चैव वनमालाविभूषितः। चित्रगुप्तो महाप्राज्ञश्चण्डाद्या यमकिङ्कराः। सर्वे नारायणाकारा बभूवुर्मधुरोक्तयः। ततः स्वयं धर्मराजस्तान् सर्वान् मनुजोत्तमान्। परमां प्रीतिमासाद्य मित्रवत् पूजयेद्द्विज!। दिव्यैर्वन्यैः फलैश्चैव तेषां पुण्यवतां नृणाम्। भोजनं कारयित्वा तु तानुवाचाथ भास्करिः। यम उवाच "यूयं सर्वे महात्मानो नरकक्लेशभीरवः। निजपुण्यप्रभावेन गम्यतां परमं पदम्। संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः। स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत्। इत्युक्ता धर्मराजेन ते सर्वे द्विजसत्तम!। दिव्यं रथं समारुह्य नारायणपुरं ययुः"।

**पुण्याह** न॰ पुण्यमहः टच् समा॰ अह्रान्तत्वेऽपि "पुण्यसुदिनाभ्यामह्नः" अमरोक्तेः क्लीवता। पुण्यदिने

**पुण्याहवाचन** न॰ ६त॰। पुण्यदिनस्य विप्रद्वारा वाचने तत्प्रकारः "पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते। एतदेव निरोङ्कारं कुर्यात् क्षत्रियवैश्ययोः। सोङ्कारं